IJCRT.ORG ISSN : 2320-2882
INTERNATIONAL JOURNAL OF CREATIVE RESEARCH THOUGHTS (IJCRT)
An International Open Access, Peer-reviewed, Refereed Journal

# साधकतमम् करणम् सुबिस्तुत विवेचनम्

डां. कादम्बिनी पाढी

बिभागिय मुख्य व्याकरन विभग

अनन्तनारायण संस्कृत महाविद्यालय

आयतपुर, केन्द्रपरा, ओदिशा

पाणिनीय व्याकरण " साधकतमंकरणम्" ( 1.4.42 ) इति षडविधेषु सूत्रेषु संज्ञा सत्रं कारक प्रकरणे अतीव महत्वपूर्णम् अस्ति । करण तृतीयाया आश्रयव्यापारौ अथौ इति वैयाकरण उक्तम् । अयमर्थ: " साधकतमं करणम्" इति सूत्रात् लभ्यते । इदं सूत्रं करणेवोधकम्, अतः यत् कारकं विना कियाया : निष्पति: सर्वथा असम्भवा तदेव करणमिति कथ्यते । तमप प्रत्यायार्थ प्रकर्ष ( सार्थकता ) प्रकर्ष नाम् व्यापारव्यवहित् पूर्वकाल वृत्तित्वम् । अर्थात् यस्य व्यापारानन्तरमेव साक्षात फलसिद्धि भक्ति स प्रकर्ष: । त्यथा - " रामेण वाणेन हतो वाली " इत्वत्र वाणस्य व्यापारानन्तरमेव प्राणवियोग रूपं फलं जायेत । अत: बाण करणम् ।

कौण्डभट्टस्य मते करणं विवक्षाधीनम् अत: "स्थाल्या पच्यते" इत्यत्र निश्चिताधिकरणत्वेऽपि स्थाली शीघ्रतरपाक साधनत्वेन अनु भक्ति वैवशर्कि करणम् एवश्च एकस्मिन् वसुनि विवक्षा भेदेन कतृत्वं करणत्वञ्च सम्भवति । नागेशस्य मते करणत्वञ्च करणताशक्तिमत्वम् ।

**<u>सूत्रार्थ</u>** : करणसंज्ञाविद्याथकं सत्रमिक्षम् । कारक इत्योधकारो विद्यते । साध्यते क्रियाया: फलसिद्धि क्रियते अनेन तत्कारण साधकम् । "साध संसिध्यो" साध्नेति अनेनेति साध् + ण्वुल इति साधके। अथात् साध्नेति क्रियाफलं साक्षात जनयति अनेनेति साधकम् । अतिशयने साधकं साधकतमम् " अतियायने तमविष्ठनै" (5/3/55 ) इत्यनेन तमप् प्रत्तयय: । तेन साधकतमं प्रकृष्टोपकारकमित्यर्थः करणमिति महासंज्ञा ; "क्रियतेऽनेनेति" विग्रह कृ धातो करणे ल्युट प्रत्यये करणमिति रूपं निष्पन्नम | क्रियासिध्यां प्रकृष्टोपकारकं करणं संज्ञं स्याक्षति सूत्रार्थ क्रियासिध्यौ अर्थात् फलसिध्यौ इति ।

**<u>प्रकृष्टोपकारकम्</u>** - यद् व्यापाराव्यवध्यानेन क्रिया निष्पत्ति: तसप्रकृष्टम् । (बृ.श.शे ) यथा – रामेण वाणेन हतो वाली । इत्यत्र राम - धनुषु बाणेषु त्रिषु प्रकृष्टोपकारक वर्त्तते । अतएव कस्य करण संज्ञा भवेक्षति जिज्ञासायां नागेशोक्तम् पुन भर्त्तृहरेः

"क्रियाया: परिनिष्पति यद् व्यापारादनन्तरम्,
विवक्ष्यत यदा तत्र करणं तत्रदा स्मृतम् " ।।

( वा. 4-3/7/90)

"स्थाल्या पचति" इत्यादौ प्रयोगे स्थाल्यादिनां विवक्षतिं करणत्वं स्वीक्रियते । अत: उच्येत ----

वस्तुतस्तदानर्देश्यं नहि वस्तु व्यवस्थितम्
स्थाल्या पचति इत्येषा विवक्षा दृश्यते यत ।

( वा. प. 3/7/91)

अत: रामेण बाणेन हतो वाली, इत्यत्र हनन क्रिया सिध्यो स्वातन्त्रात राम कती । प्राण वियोग रूप फलसिध्यो प्रकृष्टोपकारक वाणः । : वाणस्य करण संज्ञा । कर्त्त ु इष्टतमं कर्म वाली ? "कर्त्तृकरणयोस्तृतीया" इति सूत्रेण वाणेन अभयत्र तृतीया विभक्तिः । हतः इत्यत्र कर्मणि कप्रत्ययः । अतः कर्मणः उक्तत्वात् बाली इत्यत्र प्रथमा ।

**तमप् ग्रहणं किमर्थम्** – साधकं करणञ्च पर्यायवाचक शब्द । करण शब्ब्य योऽर्थ, साधक शब्दस्य सोऽपि अर्थ: । अत: करण शब्दस्य अन्वर्थ महासंज्ञा साशकत्वे ( उपकारकत्व) लब्धे साधक ग्रहणं व्यर्थम् । साधक ग्रहणं व्यर्थोभूय साधक पदं साधक नामार्थं वोधयति । अर्थात् प्रकृष्चेपकारार्थ भविष्यति । एवञ्च साधके करणम् इत्येवं सूत्रमस्तु । तत: तमव ग्रहण व्यर्थमितित्वात् तत् समाधानावसरे ।

" गङ्गाया घोष:" इत्यत्र सप्तमी विभक्ति रूपम् अस्यामारायो यत् यदि क्रियतेऽनेनेति करणमिति व्युत्पत्या महासंज्ञाया साधकार्थं गम्यते । तहि "आधारोऽधिकरणम्" इति सत्रेण अधिकरणस्य महासंज्ञा स्वीकरणीया अर्थात् अधिक्रियतेऽस्मिन्निति व्युत्पत्या अधि – कृध्यातो : अधिकरणार्थे ल्युट् प्रत्यये आधारार्थ लभ्यते । तत्रपि आधार पदम् आधारतमार्थ वोध्ययति ।

पुन: गङ्गायां घोष इति कारक प्रकरणे गौपमुख्योयो मुख्ये कार्य संप्रत्यय : "इति न्याय : अस्मात् सूत्रात् अन्यत्र न प्रवर्त्तते इति ज्ञापनार्थ तमव ग्रहणम् " । आधार अधिकरण इत्यत्र अन्वर्थ महासंज्ञा वलोदेव आधार लाभे पुनः तत् ग्रहणं सामर्थ्यात् । सर्वा वयवव्याप्त्या य आधार : स: अधिकरण इत्यर्थ: स्यात् । परन्तु गौणाधारे अधिकरण संज्ञा न प्राप्नेति । "तिलेषु तैलम् " सर्वस्मिन् आत्माअस्ति । इत्योदी एव अधिकरण संज्ञा प्राप्नुयात्। परन्तु गङ्गायां घोष इत्यत्र गङ्गाशब्दय अधिकरणत्वाभावन सप्तमीनैव प्राप्नोति, इति तमप ग्रहणमिति भाष्ये स्पष्टम् ।

**उपसंहार --**

इदं सूत्रं केवलं व्याकरण शाशत्रस्य न, अपि तु कार्यकारण भावस्य दार्यानिक विवेचनम् अपि करोति । क्रियानिष्पतौ कर्त्ता निमित्तकारणम्, करणंतु साधकतमं सहकारि कारणम् इति सिद्धति । क्रियासिद्धौ यस्य व्यापारानन्तरं फलनिष्पत्ति निश्चितैवास्ति तदेव साधकतमम् ।

एषा संज्ञा अन्यकारकाणां वाधिका न भवति । अपितु विवक्षावरेन प्रयुक्तस्य कारकस्य वैशिष्ययं प्रदर्शयति। एतेन सिद्ध भवति यत् व्याकरेण संज्ञा विवक्षाद्धीना वर्त्तते ।

## Bibliography –


1. वैयाकरणसिद्धान्तकीमुदी (वालमनोरमा - तत्वबोधिनी संहिता भट्टोजिदीक्षति गिरिधर धर्मा - चतुर्वेद) परमेश्वरानन्द शर्मा - विद्या भास्कर (सम्पादक) मोतीलाल बनारसी दास दिल्ली; २०१४ दादरा - पुनर्मुद्रणम

2. लघुशब्देन्दुशेखरः (भैरवमिश्रकृतटीका सहित) नागेश भट्ट श्रवैकुण्ठनाथ शास्त्री ( सम्पादक चैखम्बा सुर भारती प्रकाशन वाराणसी

3. वृहच्छान्देन्दु शेखर: नागेश भट्ट श्री सीताराम शास्त्री ( सम्पादक :) सम्पूर्णानन्द - संस्कृत विश्व विद्यालय वाराणसी १९६०

4. परमलघुमवषा

5. वाक्यपदीयम् ब्रह्मकाण्डम् – भत्तृहरेः - चौखम्बा कृष्ण दास अकादमी, वाराणसी